# रिक्थः

सम्पादकः

डा॰ रमेशचन्द्रहोता



मूलपाण्डुलिपिः

# अनुक्रमणिका

१. भूमिका

२. लेखकस्य परिचयः कालश्च

३. ग्रन्थस्य महत्त्वम्

४. मातृकाविवरणम्

५. उपसंहारः

# भूमिका

विदितमेव सर्वेषां विदुषां यत् धर्मार्थकाममोक्षेषु चतुर्ष्वपि पुरुषार्थेषु धर्म एव प्रथमः पदार्थः। यतस्तस्मादेव अर्थकामौ सिद्धयतः ततश्च मोक्ष इति। तदुक्तं व्यासेन महाभारते- **धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते** इति।

तत्र वैदिकेषु बहुलायाससाध्येषु कर्मसु अनेकेषामप्रवृत्त्या अस्मिन्नधर्मप्रचुरे कलिकाले तन्त्रोक्तानां कर्मणामेव श्रेष्ठत्वमुद्घोषयन् देवादिदेवमहादेवः स्वयं श्रीमुखपङ्कजादुक्तवान् महानिर्वाणतन्त्रे–

**कलिकल्मषदीनानां द्विजातीनां सुरेश्वरि।**
**मेध्यामेध्यविचाराणां न शुद्धिः श्रौतकर्मणा।।**

**न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत्।**
**सत्यं सत्यं पुनः सत्यं सत्यं सत्यं मयोच्यते।।**

**विनैवागममार्गेण कलौ नास्ति गतिः प्रिये।**
**श्रुतिस्मृतिपुराणादौ मयैवोक्तं पुरा शिवे।।**

**आगमोक्तविधानेन कलौ देवान् यजेत्सुधीः।**
**कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते।**
**न तस्य गतिरस्तीति सत्यं सत्यं न संशयः।।**

अपिच तत्रैव–

**कलौ तन्त्रोदिता मन्त्राः सिद्धास्तुर्णफलप्रदाः।**
**शस्ताः सर्वेषु कर्मसु जपयज्ञक्रियादिषु।**

एवं तन्त्रोक्तकर्मणां प्राधान्यमवगम्य तेषामेव प्रथमोपादेयतया निरूपण-मावश्यकमिति तत्रैव प्रथमः प्रयत्नः समुचित इति कृत्वा अस्मदीयानां गुरुवर्याणामादेशात् प्रवृत्तिरिति।

भारतीयसंस्कृतेः मूलाधारे वेदे गायत्र्याः स्थानं महत्त्वपूर्णम्। छन्दः शास्त्रे गायत्रीच्छन्दस्य गौरवपूर्णं वर्णनं विहितम्। गायत्रीमहामन्त्रस्य प्रभावं अनेकविधमन्त्रेषु

सर्वातिशयेन विराजते। वेदानां माताऽमृतस्य नाभिः गायत्रीच्छन्दसाम् माता, गायत्रीसर्वाणि सवनानि वहति, **गायन्तं त्रायते यस्मात्तस्माद् गायत्र्युदाहृता** इत्यादि शास्त्रवचनैः उपलभ्यते यत् उपासकानामस्मिन् विषये मतैकं दृश्यते। गायत्रीमहामन्त्राराधनेन समस्ताः अपि सिद्धयः हस्तामलकवत् उपलब्धाः भवन्तीति।

गायत्रीतन्त्रानुसारं अस्य मन्त्रस्य अधिकारी ब्राह्मण एव। मानवजीवने बुद्धितत्त्वस्य अत्यधिकं महत्त्वं दृश्यते। बुद्ध्या एव उचितानुचितमार्गस्य चयनं क्रियते येनागामी कालः सुखमयः भवति। गायत्रीमन्त्रः बुद्धिं सन्मार्गे प्रचोदयति, पापात् च दूरीकृत्य श्रेयसि योगं विदधाति। गायत्र्याः उपासनयाः जनेषु शुद्धबुद्ध्याः संचारः नूतनूर्जाया प्रवाहस्योदयश्च भवति। गायत्र्युपासकाः न कदाचिदपि अधर्मे पतन्ति। उर्ध्वारोहणमेवास्य मन्त्रस्य चमत्कारः। गायत्र्याराधकः घोरे तमसि न गच्छति। यतो हि सवितुः पुण्यमयप्रकाशः तं सततं रक्षति। असौ वरेण्यः सूर्यः आराधकं सुखं शान्तिं च यच्छति।

गायत्रीमन्त्रः बुद्धितत्त्वं सन्मार्गे नियोजयन् अत्युत्तमां अलौकिकीं दिव्यम् आभां च यच्छति। सर्वविधोपासनायाः प्रभावः बुद्धौ एव भवति।

अत एवोक्तं–

**न देवा दण्डमादाय रक्षन्ति पशुपालवत्।**
**यन्तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्।।**

भगवता श्रीमद्भगवद्गीतायां प्रोक्तं यत् **गायत्री च्छन्दसामहम्** इति। वेदेषु गायत्रीरूपेणाहमेव स्थित इत्यादि आर्षवचनैः गायत्रीमन्त्रस्य महत्त्वं सम्यग् ज्ञायते। अस्याः आराधनया ब्रह्महत्यादिदुरूहपापेभ्योऽपि जनाः मुक्ताः भवन्ति। यथोक्तं–

**गायत्रीजपकद्भक्त्या सर्वपापैः प्रमुच्यते।** (पाराशरस्मृतिः)
**सर्वपापानि नश्यन्ति गायत्रीजपतो नृपः।** (भविष्यपुराणम्)
**ऐहिकाऽऽमुष्मिकं सर्वं गायत्री जपतो नृपः।** (अग्निपुराणम्)
**ब्रह्महत्यादि पापानि गुरूणि च लघूनि च।**
**नाशयत्यचिरेणैव गायत्रीजापको द्विजः।।** (पद्मपुराणम्) आदि

## लेखकस्य परिचयः, कालश्च

सम्पूर्णा कृतिरियं काश्मिरिकोपाध्यायवंशसूतस्य पण्डितशिवरामस्य वर्तते। कविवरोऽयं काश्मीरभूपस्य महाराजरणजितसिंहकालिको वर्तते। अतः तस्य जन्म १८०० ख्रीष्टाब्दे अभूदिति वक्तुं शक्यते।

## ग्रन्थस्य महत्त्वम्।

ग्रन्थेऽस्मिन् गायत्रीमन्त्रविषये शिवस्य वर्णनोद्यमो दृश्यते। अत्र गायत्रीमन्त्रस्य विवरणं सूक्ष्मदृष्ट्या प्रतिपादितम्।

ग्रन्थेऽस्मिन् उक्तं यत् गायत्री प्रकृतिस्वरूपा प्रणवश्च पुरुषरूपः। अनयोः संयोगात् समस्तं जगत् प्रवर्तते। एषा गायत्रीशक्तिः चतुर्वेदमयीत्युच्यते।

प्रणवः शिवः। शिवशक्तिमयं जगदिदम्। अत्र परमेश्वरः शिवः वैचित्र्य-स्वातन्त्र्यस्वभावः विश्वमयशरीरः परास्पन्दविमर्शः प्रकाशादिशब्दवाच्यः अनन्त-शक्तेरधिष्ठाता स्वस्वरूपे वर्तते सर्वोऽयं प्रपंचः अस्यैव शक्तिः।

एषा शक्तिः एकैव सा तु श्री पराशब्दवाच्येति अभिनवगुप्तपादाः। अविकल्प संवित्मात्ररूपतया विभर्ति, पश्यति, भासयति च परमेश्वरः सास्य श्रीपराशक्तिरिति परमेश्वरस्वरूप प्रकाशिका परानन्दात्मकस्वातन्त्र्यशक्त्यपरपर्याया जीवनकलाधिष्ठात्री शिवकलेत्युच्यते। सैव सारतया परमेष्ठिनं हृदयं प्रोक्तम्। सा एव विमर्शक्रिया पराशक्तिरिति। इयं शक्तिः मध्यमा वैखरीरूपेण परिस्पन्दरूपा क्रियाशक्तिरित्युच्यते एवं वाग्रूपेण विख्याताशक्तिः शब्दमयी जगन्माता वेदमाता सरस्वती शब्दब्रह्मेत्यादि शब्दैः उच्यते। अस्य ग्रन्थानुसारं इयं परावागेव श्रुतौ गायत्रीत्युच्यते।

एतद्ग्रन्थानुसारं गायत्रीशब्दस्य विग्रहः गायति च त्रायते च या सा गायत्रीति कै गै शब्दे इति धात्वनुसारं गायत्रीवैखरीरूपेण शब्दो भवति। वैचित्र्यपरामर्शकारिस्वभावेन प्रकाशस्वरूपप्रत्यवमर्शेन च आराधकान् रक्षति।

अन्यश्चास्मिन्विषये उक्तं यत् गायन्तं शब्दयन्तं सर्वात्मकोऽहमेवास्मीति अत्र अहमिति सहजस्वभावां पूर्णाहन्तां विमृशन्तं त्रायते।

एतरेय ब्राह्मणे उक्तं "गायान् त्रायते या सा गायत्री" अर्थात् या गायाः प्राणान् रक्षति सा गायत्रीति।

बृहदारण्यके उक्तम् - गायत्री प्रोच्यते तस्माद् गायन्तं त्रायते ततः। गायत्री वस्तुतः स्त्रीरूपा काचित् शरीरधारिणी नास्ति। एषा परब्रह्मणः पराशक्तिः जगत्ः प्राणान् रक्षति पालयति च। एतदर्थमेव महाप्रकृतिस्वरूपा, आदिशक्तिः आलङ्कारिकरूपेण स्त्रीति संज्ञया अभिहिता। पुरुषापेक्षया नारिषु स्वभावतः ममत्वभावनाऽतिशयेन विराजते। सम्पूर्णेस्मिन् चराचरजगति ममतायाः प्रसारणात् मातृस्वरूपा गायत्री स्त्रीलिङ्गाभिधानेन वोधितः।

मन्त्राराधकं जनं (स्वपरामर्शकारिणं) रक्षपयति। यथोक्तं गीतायां **अनन्याश्चिन्तयन्तो मामित्यादि** स्वसाधकानां योगक्षेमं एषा गायत्री विदधाति।

गायत्री प्राणस्वरूपा शक्तिः प्राणरूपेणावतरति। श्रुत्यनुसारं सैव गायत्री संवित् प्राणे परिणहा प्राणा वै गायास्तां स्तत्रै तस्माद्गायत्रीति।

एषा चमत्काररूपिणी सावित्री ग्राह्यग्राहकनानावैचित्र्यभिन्नं विश्वं सुवति प्रेरयति। सत्पथे अतीव सुष्ठुतया सरति, प्रसरति, शब्दमय श्रुतिस्मृत्यादिरूपेण नानात्वं गच्छति इति सरस्वतीः। सा तुल्यश्चिदेकार्णवस्तन्मयी सरस्वतीति एकस्या एव परमेश्वर्याः पराशक्ते पश्यन्ती मध्यमा वैखरी ज्ञानेच्छाक्रिया गायत्री सावित्री सरस्वतीत्यादि नामभेद एव दृश्यते न तु वस्तुभेदः किञ्चिदपि। ईश्वरः ओंकारः प्रणवशब्दवाच्यत्वेन चायमेव वर्णितः।

गायत्र्याः स्मरणादेव जनाः सर्वपापेभ्यो मुक्ताः भवन्ति। अस्याः जपविषये उक्तं, **अशुचिर्वाशुचिर्वापि गच्छंस्तिष्ठन् यथा तथा। गायत्री प्रजपद्धीमान्, जपात् पापं निकृन्तति।** इयं मननात् पापतस्त्राति, मननात् स्वर्गं मोक्षं चतुर्वर्गफलं चाश्चुते।

ब्रह्माविष्णुशिवादीनामालयं ऊँ भूः, ऊँ भुवः, ऊँ स्वः इत्यादि प्रणवत्रयसंयोगात् त्रिपदागायत्रीत्युच्यते। यथा त्रिकालसंध्या, त्रयः प्राणायामस्तथैव आचमनमपि त्रयं तथैव ब्राह्मणः क्षत्रियः वैश्यादिवर्णाः अपि त्रय एव।

परं तत्त्वेन निर्मिता चतुर्विंशत्यक्षरा गायत्र्याः आद्यन्ते प्रणवं संयोज्य द्विजः अहर्निशं जपेत्। गायत्री एव पुरातनी ब्रह्मविद्या। विष्णु-शिव-शक्ति-सूर्य-गणपत्यादिषु मन्त्रेषु गायत्रीमन्त्रः उत्तमः।

यथा पारसमणेः स्पर्शेन अयोऽपि सुवर्णमयो भवति तथैव गायत्र्युपासकः ब्राह्मण एव वेदे द्विजाति तेन अभिहितः। सूर्य चन्द्रग्रहणे चास्य मन्त्रस्य जपेन ब्राह्मणः ब्रह्ममयः भवेत्।

हंसः इत्यत्र हकारोर्ध्वस्थितः बिन्दुञ्च गायत्र्याः उत्पतिः तथा च गायत्र्यां सर्वं कोटिकोटिशः ब्रह्मण्डम्। यथा कमलदले जलविन्दोः स्थितिर्न भवति तथैव गायत्रीस्मरणात् पापस्यस्थितिर्न भवति। सृष्ट्यारम्भे अपूर्वध्वनिः अजायत, स तु ओंम् रुपिणः आसीत् अत एवोमिति अक्षरब्रह्मः परमात्मनः स्वरूपं सृष्टेः आदिकारणं च स्वीक्रियते। ओंकारः एव प्रणवः। निराकारोपासनायामस्यैवाक्षरब्रह्मण इत्यस्य स्मरणं ध्यानं च क्रियते।

**व्याहृतिवर्णनम्–**

व्याहृतिशब्दस्यार्थः– व्या – व्यापकम्
हृ – हरणात्मकम्
ति – तापः

अर्थात् या तापं हरति सर्वत्र व्यापकाचास्ति सा व्याहृति। भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् एताः व्याहृतयः त्रिविधपापक्षालने समर्थाः। एताः सप्तव्याहृतयः वस्तुतः मन्त्रस्वरूपंभूताः सन्ति।

आसु प्रथमाः तिस्रः व्याहृतयः, भूः, भुवः, स्वरिति महाव्याहृतिपदेनाभिधीयन्ते। अनेके विद्वांसः अस्या विविधरूपेण व्याख्यानं विहितक्तः।

| **भूः** | **भुवः** | **स्वः** |
|---|---|---|
| रक्षकः | दुःखनाशकः | सुखस्वरूपः |
| पृथ्वी | अन्तरिक्षकः | स्वर्गः |
| प्राणः | अपानः | व्यानम् |
| सत् | चित् | आनन्दः |
| अग्निः | वायुः | आदित्यः |
| वाणी | मनः | प्राणाः |
| सत्ता | चिन्तनम् | प्रकाशकः |
| ऋक् | यजुः | सामः |

एते मन्त्राः जीवनस्योन्नतौ सारभूताः तत्वत्रयप्रकाशिकाश्च सन्ति। ब्रह्माण्डेऽस्मिन् यत्किंचित् दृश्यते तत्सर्वं त्रिमहाव्याहृतिष्वन्तर्भूताः एव सन्ति मन्त्रोत्पत्तिः–

ब्रह्मणे प्रथमं प्रणवस्य बोधः अभवत्। तस्मात् प्रणवात् सप्तव्याहृतीनां प्रादुर्भावः एषु त्रिव्याहृतीनां महाव्याहृतिसंज्ञा।

ब्रह्मणा चतुर्विंशत्यक्षरा गायत्री मन्त्रस्य रचनाकृता। एतेभ्यः चतुर्विंशत्यक्षरेभ्यः चतुर्वेदान्तम् उत्पत्तिः, वेदेभ्यश्च विविधाः विद्याः शास्त्राणाञ्चोत्पत्तिरिति। अतएव गायत्री वेदानां मातेति उच्यते। आदिममन्त्रत्वात् "गायत्रीमन्त्रं मन्त्रराजः महामन्त्रेत्यादि शब्दैः सम्बोध्यते।"

गायत्री ब्रह्मस्वरूपा, अतएव जगज्जननी वर्तते। अतएव सर्वैः त्रिसन्ध्यं जपादिकं क्रियते।

**पौराणिकं कथानकं** सृष्ट्यादौ ब्रह्मणः शरीरात् तरुण्याः प्रादुर्भाव अभवत्। तस्याः साहाय्येन सृष्टेः निर्माणम् अजायत। अतएव सा ब्रह्मणः पत्नी सावित्रीरुपेण प्रतिष्ठिता अभवत्।

जडसृष्टि सञ्चालक शक्तिः प्रकृतिः, चैतन्यसृष्टिजनयित्रीशक्तिः सावित्रीत्युच्यते। गायत्री सावित्र्याः एव स्वरूपं मन्यते।

ऋग्वेदे वारमेकम्, यजुर्वेद चतुर्वारं सामवेदे वारमेकं गायत्रीमन्त्रस्योल्लेखो दृश्यते।

गायत्रीमन्त्रस्य सारभूतमर्थमेव वक्तुं शक्यते यत् ईश्वरः सर्वव्यापकः सर्वेषां स्वामी, सर्वेषुश्रेष्ठः वयं तस्य दिव्य तैजसतत्वं आह्वयामः यो नः धियो सन्मार्गं प्रचोदयात्।

**जपेनलाभः–**

सांसारिक वैभवानां प्राप्तिः ब्रह्मज्ञानस्य लाभश्चानेन भवति। ज्ञाताज्ञात अनेकविधदोषाः जीवने भवन्ति। सर्वविधदोषाणां निराकरणं गायत्रीजापेन क्रियते दैनन्दिनदोषाणां निःसारणार्थं प्रतिदिनं गायत्रीमन्त्रस्य जपः कर्त्तव्यः। ब्रह्महत्यादि दोषाणां निराकरणमनेन सम्भवति। अस्याः जापेन सद्बुद्धेः विकासः श्रद्धाः भक्ति आस्थायुक्ताश्च जनाः भवन्ति शाश्वतपरमपदं चानायासेन लभन्ते, सर्वविध दुःखदैन्यादीः भूतप्रेतादिविध्नानां, क्रूरग्रहाणां निराकरणं चानया सद्यः भवति। अनेन जापेन नापमृत्युः, अपितु चतुर्वर्गफलप्राप्तिश्च लभ्यते।

## मातृकाविवरणम्

श्रीरघुनाथमन्दिरपुस्तकाल्यात् संगृहीता

क. मातृकासंख्या – २६६८ क

ग्रन्थनामः – गायत्रीमन्त्रविवृतिः, विषय – भक्तिशास्त्रम्

ग्रन्थकारः – शिवरामस्वामिनः, उपाध्याय कुलोत्पन्नः

पत्राणि – ३, श्रेणयः, अक्षराणि – २३/७६

लिपिः – शारदा

आधारः – कर्गजपत्रम्

सम्पूर्णा कृतिरियं पण्डितशिवरामस्य काश्मीरिकोपाध्यायवंशसूतस्य यः श्रीमहाराजरणजित्सिंहस्य काश्मीरराज्यारम्भे जीवितवान्।

ख. जम्मूस्थ श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठ, पुस्तकालयात् संगृहीतः।

मातृका संख्या – १२९,

मातृकानाम – गायत्रीमन्त्रविवृतिः

ग्रन्थकारः – शिवरामोपाध्याय (शिवरामस्वामी)

विषयः – भक्तिशास्त्रम्, विवरणम्, पूर्णम्,

स्थितिः – समीचीना, लिपिकालः – संवत्, ५०२०

पत्रसंख्या – २७ प्रतिपृष्ठं पंक्तिसंख्या – १८

प्रतिपंक्ति वर्णसंख्या – १८, लिपिः – शारदा, आधारः – कर्गजपत्रम्

## उपसंहारः

प्रस्तुतग्रन्थस्य लेखकेन गायत्रीमन्त्रविवृत्ति नामकेग्रन्थे गायत्रीमन्त्रः चतुर्वेदमयत्वेन साधितः। गायत्रीप्रकृति प्रणवश्च पुरुषरुपेणात्र स्वीकृतः। प्रणवः शिवस्वरूपः गायत्री च शक्तिरुपा वर्तते। अतः गायत्रीमन्त्रं शिवशक्तिरूपां जगत् च शिवशक्तिमयमिति अत्र साधितम्।

गायत्रीशब्दस्य व्याख्यानं, गायत्रीमन्त्राक्षराणां विवेचनं, गायत्रीमन्त्रस्य माहत्म्यादिवर्णनं सम्यक्प्रतिपादितमत्र। सविता, सरस्वती वा अस्यैव वाचकः। अत्रोक्तं सरस्तुल्यः कश्चिदेकार्णवः तन्मयीसरस्वती अनेकस्याः एव परमैश्वर्याः पराशक्तिः पश्यन्ती मध्यमा वैखरी ज्ञानेच्छाक्रिया गायत्री सावित्री सरस्वतीत्यादि नामाभेदो नतु वस्तुभेदः।

गायत्रीमन्त्रे त्रिविधशक्तिनां निवासः, इच्छा, क्रिया ज्ञानरुपेणास्ति अष्टत्रिंशत् कलारुपेण शब्दब्रह्म अत्र विराजते।

**ओंकारो ब्रह्म इत्युक्तः उकारो विष्णुरुच्यते।**
**मकरो रुद्र आदित्य अर्द्धचन्द्रस्तु ईश्वरः।**
**विन्दुः सदाशिवो देवः प्रणवः पञ्चदैवतः।**
**प्रणवे पञ्चदेवानां स्थापना कृता वर्तते।**

अनेन अस्य मन्त्रस्य चमत्कारिणी शक्तिः वर्णध्वनिना स्फुटिता सन् समस्तान् दुरिवान् अघादीन् चापाकरोति।

अस्मिन् श्लोके प्रणवे स्थितानां देवानां ब्रह्मरुपेण वर्णनं दृश्यते। यतो ह्यत्रोक्तम्–

**सद्यो जातः अकारस्तु उकारो नामदेवकः।**
**अधोरस्तु मकारो वै तत्पुरुषोऽर्धचन्द्रकः।।**
**विन्दुरीशान इत्युक्तः पंचब्रह्मात्मकः स्थितः।**

अस्य मन्त्रशक्ति विषयेऽत्रोक्तम् – शक्तिशर्क्तिमतोरभेदः सर्वदा दृश्यते। अत्र परात्मनः शिवस्य एषा गायत्री पराशक्ति एव। यथा आलोकः दीपस्य शक्तिः किरणैः भास्करस्य शक्तेर्बोधो भवति तथैव शिवस्य शक्ति गायत्रीति वक्तुं शक्यते अत्र शक्तिस्वरूपा गायत्री भगवतः शिवस्य प्रकाशेन भासते। गायत्रीमन्त्रः वर्णात्मकोऽस्ति। वर्णाः वाग्रुपिणः वाणी च शिवरूपिणी भवति। उक्तमत्र – तन्मत्रवीर्यं भगवान् शब्दराशिः परः प्रभुः विद्याशरीरमन्त्रेति शिवसूत्रं प्रदर्शितम्।

सर्वविधमन्त्रेषु उत्तमः अघमर्षकः एतादृक् न कश्चिदन्यो मन्त्रः, अत एव गीतायामुक्तं भगवता श्रीकृष्णेन **गायत्री च्छन्दसामहमिति।**

---

१. च्छविपदार्थाभासंरूपा पराशक्ति सा–इति ख पुस्तके पाठः
२. स्फुरतात् परोजिसिमें त्वत्प्रतिपादपदे–इति ख पुस्तके पाठः।
३. ख. षट्त्रिंशतत्वात्मक इति पाठः।
४. ख. शरीरैः–इति पाठः।
५. ख एव इति अधिकः पाठः।
६. ख. निवृति–इति पाठः।
७. ख. वेदकत्वलक्ष्य लक्ष्यणैनैकांशेनवेद्यं सर्वमधिष्ठायात्मकपरतन्त्रं – इति पाठः।
८. ख. सैषा– इति पाठः।
९. ख. परमेष्ठिने – इति पाठः।
१०. ख. भाव – इति पाठः।
११. ख. रुच्यते – इति पाठः।
१२. ख. शुद्धमृतमयात्मैवैत्यत्राभिसन्धिः – इति पाठः।
१३. ख. इति वाग्वै – इति नास्ति।
१४. ख. इदं सर्वं – इति नास्ति।
१५. ख. अस्यार्थः। यत्किंच वाग्रूपं कथामात्रं सैवगायत्री इत्यधिकः पाठः।
१६. ख. निरुतरुस्वस्य – इति पाठः।
१७. ख. रुणजगसमूलपकिति – इति पाठः।
१८. ख. तकार इति पाठः।
१६. ख. हकार – इति नास्ति।
२०. ख. चिञ्चेय – इति पाठः।
२१. ख. कस्या – इत्यधिक पाठः।

२२. ख. कस्मात् – इति पाठः।
२३. ख. गायते – इति पाठः।
२४. ख. गे – इति पाठः।
२५. ख. गायत्रि – इति पाठः।
२६. ख. अनुग्रह – इति पाठः।
२७. ख. स्संशयाय – इति पाठः।
२८. ख. यद्वा – इति नास्ति।
२९. ख. सर्वमिदं – इति नास्ति।
३०. ख. श्रीभगवान् – इति नास्ति।
३१. ख. तघटनाया – इत्यधिकः पाठः।
३२. ख. सारं – इति अधिकः पाठः।
३३. ख. भगवती – इति अधिकः पाठः।
३४. ख. सेव्यत – इति पाठः।
३५. ख. शक्ति – इति नास्ति।
३६. ख. ज्योतिरिति – इति पाठः।
३७. ख. विष्णुरित्युच्यते – इति पाठः।
३८. ख. रुद्रदैवत्येऽर्द्धचन्द्रस्तदीश्वरः – इति पाठः।
३९. ख. रूप – इति नास्ति।
४०. ख. इति – इत्यधिकः पाठः।
४१. ख. ईश्वरः – इति पाठः।
४२. ख. स्वात्मस्वरूपा – इति पाठः।
४३. यद्यपि प्राकृतान्ततत् सवितुरित्यादिकाश्रुतिः – इति नास्ति।
४४. प्रकर्षस्य – इत्यधिकः पाठः।
४५. विश्वोत्तीर्णत्वमुपदिशति – इत्यधिकः पाठः
४६. पादोऽस्य – इत्यधिकः पाठः।
४७. ख. उतैनं – इति नास्ति।
४८. ख. च पद प्रक्रान्त – इति पाठः।
४९. ख. तेन सर्वव्यापकं – इति पाठः।
५०. ख. नस्पन्दोनापि वै ध्यानं न स्फुरन्नापि कापि हि।
५१. ख. प्रकाशपराभव इति पाठः
५२. ख. श्रुत्योऽपि इति पाठः
५३. ख. दक्षा कस्मैं इति पाठः
५४. ख. संसारिभूमिकायामपि – इति पाठः।
५५. ख. विनीत्य – इति पाठः।
५६. ख. एवाधिगन्तव्येमिति – पाठः।
५७. ख. नेहास्यवितन्यते।
५८. ख. इति श्रुतेः – अधिकः पाठः।
५९. ख. शिथिलश्चेत् न विमर्शात्मक – इति पाठः।

६०. ख. धियोयोन इति नास्ति।
६१. ख. प्रचोदकत्वानुपपत्तेः – इति पाठः।
६२. ख. विशिष्टः – इति पाठः।
६३. ख. प्रसंगात् – इति पाठः।
६४. ख. स्वभावपरामर्शस्य – इति पाठः।
६५. ख. विमर्शविन्दुरन्यथा – इति पाठः।
६६. ख. स्सर्वकर्मा – इत्यधिकः पाठः।
६७. ख. करोमिति – पाठः।
६८. सावित्रमैश्वस् इति ख पुस्तके पाठः।
६९. व्युत्थान इति शब्दः वि+अक्त+या गतौ प्रापणेवा+ल्युट्+यु+अण् गत्यर्थो वा प्राप्त्यर्थो वा।

# गायत्रीमन्त्रविवृतिः

सम्पादकः डा॰ रमेशचन्द्रहोता

**श्रीगणेशायनमः**

**प्राणत्राणपराभिधेयसुमिलद्गायत्रनाम्नात्मन-**
**स्त्रैलोक्यत्रिमरुत्रिवेदचरणेष्वेकांशभावस्थिता।**
**हृद्व्योमस्थितचिद्विच्छविपदासद्रूपरूपापरा[१]**
**शक्तिः सा स्फुरतात्[२] परेरजसि मे लब्धप्रतिष्ठापदे।। १।।**

**ईश्वरप्रत्यभिज्ञार्थं शिवस्यायं समुद्यमः**
**गायत्रीमन्त्रविवृतिद्वारा स्वस्य परस्य च।। २।।**

**गायत्री प्रकृतिर्ज्ञेया प्रणवः पुरुषः स्मृतः**
**ताभ्यामुभयसंयोगाज्जगत्सर्वं प्रवर्तते।। ३।।**

**चतुर्वेदमयीदेवी गायत्री शक्तिरुच्यते।**
**प्रणवः शिव इत्येवं शिवशक्तिमयं जगत्।। ४।।**

इह हि परमेश्वरः षट्त्रिंशत्तत्त्वात्मकवैचित्र्यस्वातन्त्र्यस्वभावः[३] पूर्णसंविद्रूपो विश्वोत्तीर्णो विश्वमयशरीरः[४] परास्पन्दविमर्शप्रकाशादिशब्दवाच्योऽनन्तशक्तिचक्र-चुम्बितकायः सर्वत्र सदा स्वस्वरूपे[५] वर्तत इति शैवागमरहस्यम्। सर्वोऽयं प्रपंचोऽस्य शक्तिः **शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तुमहेश्वर** इति हि शास्त्रम्। मुख्या तु शक्तिरस्यैकैव श्रीपराशब्दवाच्या अभिहितेयमाचार्याभिनवगुप्तपादैः ययेदं शिवा-दिकीटान्तमविकल्पसंविन्मात्ररूपतया विभर्ति च पश्यति च भासयति च। परमेश्वरः सास्य श्रीपराशक्तिरिति परमेश्वरस्वरूपप्रकाशप्रत्यवमर्शमात्ररूपा विमर्शशक्ति-शब्दवाच्या स्वस्वरूपशिवस्वभावाभिन्ना तद्व्यतिरिक्तविषयान्तरनिवृत्तगतिः[६] परानन्दात्मकस्वातन्त्र्यशक्त्यपरपर्याया शिवादिक्षित्यन्तव्यापिनी देशकालाकारानवछिन्ना जीवकलामधिष्ठायात्मपरतन्त्रं[७] कृत्वा वर्तमाना शिवकलेत्युच्यते, तदुक्तमाचा-र्योत्पलदेवपादैः। **चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदितेति** तथा **सा स्फुरन्ती महासत्ता देशकालविशेषिणी सैव[८] सारतया प्रोक्ता हृदयं परमेष्ठिन[९]** इति। महाप्रकाशस्य या स्वात्मनि विश्रान्तिरहमितिरूपा सा परा यत्रेदन्तायाः कल्पनमारोपणमपसारणं वा नास्ति विमर्शक्रियापराशक्तिरिति सिद्धान्तः। इयमेव परादेवी यदा इदं भाग[१०] महम्भावग्रस्ततया कल्पयति, प्ररोहरहितत्वा-दहमिदमित्युल्लिखति। तदा पश्यन्ती वाक् सदाशिवादिभूमिकाज्ञानशक्तिरित्युच्यते।[११]

यदा त्वियमेव विमर्शशक्तिरहंभावादिदन्तामपकर्षति। अहमिदं जानामि करोमीति। संकल्परूपेणावतरति तदा मध्यमा वागिच्छाशक्तिरित्युच्यते। द्वैधीभावस्त्वस्या अन्यत्र दर्शितः। मध्यमारूपं भगवतैव दर्शितम् हेतुः सङ्कल्पजालस्य **मनोऽधिष्ठायिनी शुभा इच्छेति परमाशक्तिरुन्मिमीलत्ततः परमिति।** इयमेव घनतामापन्ना वैखरीरूपेण पुरुषप्राणपरिस्पन्दाधीनाभिव्यक्तिकत्वात् स्थूला सती क्रियाशक्तिरिति गीयते। यदुक्तं **ततो वागिति विख्याता शक्तिः शब्दमयी पुरा प्रादुरासीज्जगन्माता वेदमाता सरस्वतीति।** इयमेव शब्दब्रह्मेत्युच्यते। अस्यां दशायामहं शिरश्चालयामि चलामीत्यादिविमर्शप्राधान्यमियति सर्वत्र विमर्शरूपतैवानुगतेति विमर्शरूपसर्ववाग्रूप इति निश्चयः। यद्यपीयं पारमेश्वरी पराशक्तिर्गेहघटादिपर्यन्तं प्रसरणशीलतया वर्त्तते तथापि कृत्स्नप्रपञ्चस्य सामान्यसंवित्प्रकाशमन्तरेणानुपपन्नस्वरूपस्य प्रत्यवमर्शिन्याः सत्या अस्याः सर्वदा शिवस्वभावाभिन्नत्वं न व्याहन्यते। यदाह भट्टनारायणः प्रसरद्विन्दुनादाय शुद्धामृतमयात्मने इति। प्रसरद्विन्दुनादोऽपि परमेश्वरः शुद्धामृतमयात्मै-वेत्यत्राभिसन्धिः[१२]। इयं परा वागेव श्रुतौ गायत्रीत्युच्यते। तथा च श्रुतिः। **गायत्री वा इदं सर्वं यदिदं किंचेति वाग्वै**[१३] **गायत्री वाग्वा इदं सर्वं**[१४] **वाचारम्भणं विकारो** नामधेयं शब्दे सर्वं प्रतिष्ठितमित्यादि तथा च सिद्धसूत्रं गायत्रीकथा इति[१५] वन्नविहीन निरुतुरुरवसु।[१६] रुजगसमूलप्रकृतिगायत्रीनेक[१७] [१८]उकारहकारविकसरुवन्नचित्र[१९] चिंजेय[२०] विचित्र इति [२१]कस्मासंकेतप्रकाशे[२२] गायति[२३] च त्रायते च या सा गायत्री कै गै[२४] शब्दे इति धात्वनुसाराद्गायति[२५] वैखरीरूपेण शब्दोभवति त्रायते[२६] च विश्ववैचित्र्यपरामर्शकारिस्वभावरूप सामान्यसंवित्प्रकाशस्वरूपप्रत्यवमर्शेन रक्षति। स्वात्मसमावेशसंपत्तिं करोतीति गायत्री। अथ च गायन्तं शब्दयन्तं सर्वात्मकोऽहमेवास्मीति अहमिति सहजस्वभावां पूर्णाहन्तां विमृशन्तं त्रायते अहं भावातिरिक्ताऽत्यन्ता [२७]सत्तुल्यदेवतान्तरविषयो[२८]पासनकलङ्कसम्पर्कात्[२९] पालयति।[३०] प्रतिष्ठितसहजानन्द-संविदात्मविमर्शं हित्वा उपासनान्तरं कलङ्क एव यदुक्तं महागुरुभिः **उक्तित्वात्म**[३१] **समाधानं ये ध्यायन्त्यस्य देवताः भिक्षन्ते भूरिवित्तास्ते भिक्षित्वापि बुभुक्षिता** इति। अनुशक्तिः[३२] पारमेश्वरी स्वात्मविमर्शं बोधयित्वा न पुनः संसारकूपे[३३] पातयति। अतो गायन्तं त्रायत इति। यद्वा[३४] **गायन्तं त्रायते यस्मात्, गायत्री त्वं ततः स्मृतेति** पद्धति नीत्या गायन्तं सर्वमिद[३५] पदार्थजातं परमेश्वरपरावाक्- शक्तिविजृम्भितं स एव सर्वप्रमातृणां स्वात्मा अतः किमन्यच्चिन्तयेत्यादि विमृशन्तं प्रमातारं त्रायत इति। तथा च स्वपरामर्शकारिभक्तजनरक्षणमुपदिशति। श्री भगवान्-[३६]

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।** इति।।

परमार्थस्तु गायान् प्राणान् त्रायत इति प्राणधारिणी प्राणस्वरूपा शक्तिर्गायत्रीत्यर्थः।

प्रथमं प्राणरूपेणावतरति या सैव गायत्री वा प्राक् संवित्प्राणे परिणता प्राणा वै गायास्तांस्तत्रैतस्माद्गायत्रीति श्रुतेः।[३७] तत्र त्रायते पालयतीत्यर्थः। इयमेव सावित्रीत्युच्यते। सवितुर्बोधादित्यस्येयं सावित्री सूते परा हन्ता चमत्कार[३८] ग्राह्यग्राहकनानावैचित्र्यभिन्नं विश्वं सुवति प्रेरयति सत्पथेऽसत्पथेवेति सविता बोधादित्यः तस्य सम्बन्धिनी सरस्वतीति च। सुष्ठ्वतीव सरति प्रसरति शब्दमयश्रुतिस्मृत्यादिरूपेण नानात्वं गच्छतीति सरस्वती। अथ च सरस्तुल्यश्चिदेकार्णवस्तन्मयी सरस्वतीत्येकस्या एव पारमेश्वर्याः पराशक्तेः पश्यन्ती मध्यमा वैखरी ज्ञानेच्छाक्रिया[३९] गायत्री सावित्री सरस्वतीत्यादिनामभेदो न वस्तुभेदः। चितः स्तुतावत्यस्माभिर्नामभेदेन स्वातन्त्र्य-तश्चमत्कारप्रकाशपरामर्शरूपितः **स्फुरतान्मे परः शम्भुर्दृश्याकारेण संवृत**[४०] इत्यस्मिन् पद्ये निर्वृतीच्छाज्ञानक्रिया वर्णिताः। तदेवं शक्तित्वे सति शक्तिमन्तमियमपेक्षत इत्यभिन्नमातृकात्मकः शब्दराशिरूपक्रियाशक्ति[४१] प्रधान ईश्वरः शक्तिमान् ओंकारप्रणवशब्दवाच्योऽयमेव वर्णितः।

श्रीभागवतपुराणे–

**स एव जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।**
**मनोमयं सूक्ष्ममुपेत्य रूपं मात्रास्वरो वर्णयति स्थविष्ठ इति।।**

अस्यार्थस्तु तत्रैवावधार्यः ग्रन्थगौरवभयादिह न तन्यते। ओंकारस्वरूपं पुनर्बहुधा दर्शितं रहस्यशास्त्रेषु–

**इच्छा क्रिया तथा ज्ञानं ब्राह्मी रौद्री च वैष्णवी।**
**त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति।।**[४२]

**शब्दब्रह्ममयं देवमष्टत्रिंशत्कलान्वितम्।**
**पंचमात्रासमारूढं कारणं परमं शिवम्।।**

**अकारो ब्रह्म इत्युक्त उकारो विष्णुरुच्यते।**[४३]
**मकारो रुद्र आदित्य**[४४] **अर्द्धचन्द्रस्तु ईश्वरः।।**

**बिन्दुः सदाशिवो देवः प्रणवः पंचदैवतः।**
**सद्योजातः अकारस्तु उकारो वामदेवकः।।**

**अघोरस्तु मकारो वै तत्पुरुषोऽर्धचन्द्रकः।**
**विन्दुरीशान इत्युक्तः पंचब्रह्मात्मकः स्थित इत्यादि।।**

**अकारो विराट उकारो हिरण्यगर्भः मकारोऽव्यक्तमेष।**

**त्रिमात्रस्त्रिपाद ओंकार परापररूपं[४५] इति वेदान्तः।।**

**निर्णीता वाक्स्वरूपेयं गायत्री वेदमातृका।**
**अधुनैतदुपासायां कारणं वर्ण्यते पुनः।।**

**शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः।**
**अतस्तद्धर्मधर्मित्वं पराशक्तिपरात्मनोः।।[४६]**

**यथालोकेन दीपस्य किरणैर्भास्करस्य वा।**
**जायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये।**
**इति न्यायाच्छिवज्ञानं शक्तौ च प्रतिभासते।**
**तच्छक्त्युपासना कार्या गायत्री शक्तिरुच्यते।।**

**मन्त्रस्वरूपा गायत्री मन्त्रवर्णात्मिका अपि।**
**वर्णा वाग्रूपिणः सर्वे वाणी च शिवरूपिणी।।**

**तन्मन्त्रवीर्यं भगवान् शब्दराशिः परः प्रभुः।**
**विद्याशरीरमन्त्रेति शिवसूत्रं प्रदर्शितम्।।**

**न गायत्र्याः परं जप्यं गायत्रीच्छन्दसामहम्।**
**इत्यादिवचनैर्ज्ञेयो गायत्रीमन्त्र उतमः।।[४७]**

**स्वात्मस्वरूपं[४८] गायत्रीमविमृश्य जडो जनः।**
**य आस्ते क्षुद्रदेवादिमन्त्रजापी पशुर्हि सः।।**

**यद्यपि व्याकृता तत्सवितुरित्यादिकाश्रुतिः।[४९]**
**आचार्यैः पदवाक्यार्थज्ञानादिकारणैः परैः।।**

**तथाप्यात्मप्रबोधार्थं शिवरामेण सूरिणा।**
**प्रकटीक्रियते शैवशास्त्रयुक्त्यातिरम्यया।।**

**अथ मन्त्रो व्याख्यायते।**
**ओ३म् भूर्भुवः स्वःतत्सवितुर्वरेण्यं भर्गो देवस्य**
**धीमहि। धियो यो नः प्रचोदयात्।**

ओम् व्याख्यातस्वरूपः परमेश्वरोऽयमेव सदा सर्वस्य स्वात्मभूतत्वाद्ध्यान-विषयो येन, कदाचित्पशुप्रमातुः स्वतन्त्रशक्तिपातः[५०] प्रक्षेपणपरः **शिवो भावापादकं** समावेशात्मकसत्पथा प्रचोदनं करिष्यति स्वच्छन्द इति त्रिकादिदर्शनरहस्यं पादत्रयेण

श्रोत्रियजनश्रुतिपथपथिकीकुर्वाणः प्रथमं सप्तव्याहृतिभिः श्रीपरमेश्वरस्य विश्वमय-शरीरत्वमुपदिशति ओ३म् भूर्भुवः स्वरिति भूः भुवः स्वरिति लोकत्रयम् ओ३म् स्वस्तीत्यन्वयः यत्तावदियं प्रसिद्धा लोकत्रयकल्पना तदोङ्कारः श्रीपरमेश्वर एव भवतीत्यर्थः। उपलक्षणमेतद्यत्किंचिच्चतुर्दशभुवनात्मकं विराट्शरीरं यावच्छिवादिक्षित्यन्तं तत्त्वजातमपि तत्सर्वस्वतन्त्र ईश्वर एव एतदेव त्वस्य स्वातन्त्र्यं यत्तां तामवस्थामापन्नोऽपि परस्मात् पूर्णस्वरूपान्न चलति कदाचित् सर्वस्य प्रपञ्चजातस्य प्रकाशैकमग्नस्य प्रकाशमयत्वमेव प्रकाशमानत्वात्।

अथैतद्भिन्नस्य सत्तैव न स्यात् कथं विश्वं प्रकाशेत तस्माच्चैतन्यप्रकाशसत्तया विश्वस्फूर्तिः। तथा च श्रुत्युपदेशः—

**तमेव भान्तमनुभाति सर्वं।**
**तस्य भासा सर्वमिदं विभातीति।।**

नन्वोङ्कारस्य परमेश्वरशब्दाभिधेयत्वे किं प्रमाणमिति चेत् वक्तुः स्मृतये यथा **ओमित्येकाक्षरं ब्रह्म ब्राह्ममक्षरमोमिति प्रणवः सर्ववेदेषु तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः** तस्य वाचकः प्रणवो यस्येत्यादयः। ओंकारस्याभ्युप-गमोऽर्थः ओमेवं परमे मते इति वचनात् अभ्युपगमोप्यस्तीति सद्रूपोऽङ्गीकारः परमेश्वरोऽपि सद्रूप एव तेन ओंकारलक्षणप्रणवास्तिरूपयोर्घटकलशादिवत् पर्यायत्वं व्यस्तव्याहृतिपक्षेप्ययमेवार्थः। सर्वस्येश्वरत्वे रहस्यशास्त्रयुक्तिश्च ज्ञानक्रिये एव सदा शिवेश्वरौ ते एव सामान्यतः प्ररूढे विद्याकाले विशेषतः प्ररूढे बुद्धीन्द्रियाणि-कर्मेन्द्रियाणीति सर्वं शिवमयमेव सर्वं खल्विदं ब्रह्मेति श्रुतेश्च ओंकार एव जीवनं विन्दुनादौ हि शक्त्याद्यण्डचतुष्टये इत्यर्थबोधको लिप्यः प्रणवः परमाक्षर इति नीत्या ग्रामीणलिप्यार्थानुसारेण सर्वमिदं विन्दुनादात्मकमिति बोधयन् विश्वस्य शिवमयत्वं बोधयतीति सच्छास्त्ररहस्यम्।

प्रत्यभिज्ञा च ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतमिति।[५१] तत्सवितु-रित्यादिना तत्सर्वसामान्यं महासत्तारूपं तदा सर्वनामत्वात्प्रसिद्धं च स्वप्रकाशत्वेन परप्रकाशलक्षणसाध्यत्वाभावात् अहं रूपस्य सर्वजनसिद्धत्वात् सर्वैरनुभूतं[५२] च उतैनं[५३] विश्वाभूतानीतिश्रुतेः सर्वकारणत्वेन पूर्वप्रक्रान्तं[५४] च तत्सर्वव्यापक[५५] भर्गः प्रकाशं संवित्पूर्णस्वातन्त्र्यस्वभावं तत्सवितुर्बोधादित्यस्वभावशब्दवाचस्य[५६] संवन्धि धीमहीत्यन्वयः। तत्रेह स्वभाव एव परमोपादेयः स्वभावलाभार्थमेव ब्रह्मदीक्षासंस्कारः पशुप्रमातुः गायत्रीमन्त्रजपोऽप्येतत् प्रयोजन एव, स एव सर्वोपादेयत्वाद्ध्यानविषयः स्वभाव एव परमोपादेय इति ह्याचार्याः यथा स्वभावस्य स्वरूपं तथा तन्त्रसाराख्ये ग्रन्थे विज्ञानभेदप्रकाशने प्रथमाह्निके वितत्य निर्णीतमाचार्याभिनवगुप्तपादैरिति नास्माभिः

प्रकाश्यते न तु स्वभावः सविताकथं येन सवितृस्वभावयोरैक्यं प्रत्यवमृष्यते उच्यते स्वोऽसाधारणः भावः सत्ता चेष्टा वा आत्मा वा परस्य रूपः स्वभावः सर्वस्य स्वरूपं सत्ताज्ञानं क्रिया वा अहमस्मि जानामि करोमीत्यादि हि प्रत्यवमृष्यते सर्वेण अतः स्वभावः संविदेव प्रकाशो वा सविता हि किरणप्रसरणकारी पदार्थः स एष वै सविता य एष तपतीतिश्रुतेः तपति जानाति करोति च यस्य ज्ञानमयं तप इति श्रुतेः तेन ज्ञानादिलक्षणतापकारी ज्ञानादिमयः सविता स्वभावोऽपि ज्ञानमेवेत्यनयोर्न विशेषः। तस्मात् सुष्ठूक्तं सवितुर्बोधादित्यस्य स्वभावशब्दवाच्यस्येति धीमहीति ध्यायेम स्वाभेदेन विमृशामः सत्येन चित्रयाम इति यावत्। एतादृशस्य सर्वव्यापकस्थानं तस्यापरिच्छिन्नस्याऽभेदविमर्श एव ध्यानम् नत्वव्यापकविनाशि परिच्छिन्नपंचवक्त्रादिकल्पनम्–

उक्तं हि विज्ञानभैरवे–

**ध्यानं या निश्चला बुद्धिर्निराकारा निराश्रया।**
**न तु ध्यानं शरीरादिमुखहस्तादिकल्पना।।**

वसिष्ठोऽपि–

**सोऽहं चिन्मात्रमेवेति चित्रञ्च ध्यानमुच्यते।**
**ध्यानस्याविस्मृतिः सम्यक् समाधिरभिधीयते।।**

न तु ध्यानं प्रसिद्धमेव तत्कथमुक्तं न तु पञ्चवक्त्रादि कल्पनमिति चेत् सत्यम्। परंत्वक्षैरारोपितत्वान्न परमार्थसदेतत् तथाचोक्तं श्रीभागवतपुराणे–

**एतद्रूपं भगवतः स्वरूपस्य चिदात्मनः।**
**मायागुणैर्विरचितं महदादिभिरात्मनि।**
**यथा नभसि मेघौघोरेण्डर्क्षपार्थिवोऽनिले**
**तथा द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिरिति।।**

ननु ध्यानकल्पना तन्त्रेषु भगवतैव कृता तत्किं नांगीक्रियते। गुरुभिरुन्मत्तैरिवेति चेत् तदेतत्तावदास्ताम् महाप्रकाशशरीरः सर्वव्यापको महेश्वर इति सर्वस्याऽविवादस्तावद् नह्येतादृशस्य ध्यानं सम्भवति। तस्य सकलकल्पनायाः सारत्वात् सर्वव्यापकसंविदि ध्यानासंभवात् ध्यानस्य मनोगोचरत्वेन ब्रह्मणो मनोवागविषयत्वात् यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेतिश्रुतेः। तर्हि ध्यानस्याविषयत्वेनागमाप्रामाण्यशंका गतेति चेत् मैवं वोचः ध्यानं हि पशुप्रमातृविषयं भगवता कृतं तेन नानाप्रमाण्यशंका वेदस्य यत् उक्तस्वरूपे भगवति परमशिवे पशुप्रमातुश्चितं न विशति कंचुकत्रितयादि विद्धत्वे नाप्रवुद्धत्वात्। ध्यानादिकं पशुविषयमेव दर्शितं विज्ञानभैरवादौ यत्किंचित्सकलरूपं

भैरवस्य प्रकीर्तितम्।

**तदसारतया देवि विज्ञेयं शक्रजालवत्।**
**मायातुल्योपमं चैव गन्धर्वनगरभ्रमम्।।**

ध्यानार्थं श्रान्तबुद्धीनां क्रियाडम्बरवर्तिनामिति भैरवस्तोत्रस्यापि ध्यानं पूजादिकं जप्यं होमादिस्त्याग एवं च आह्वानकरणं स्थानं आरुरुक्षुषुः दर्शयेत् 'गीतासु च'–

**आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते** इति। भागवतेऽपि यावन्न जायेत परावरे विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत् स्थवीयः पुरुषस्वरूपं क्रियावसाने पुरुषं स्मरेत् इति। यदि पुनः कदाचित् प्रमातुः परमेश्वरप्रसादात् प्रबुद्धता परमशिवभूरभ्येति हृदयगोचरं तदा न किचिंत्प्रयोजनं सत्कारवस्तुविषयध्यानपूजाद्याटोपेन तथा च पशुप्रमातारं प्रत्येव वसिष्ठोपदोशः यावदप्रतिबुद्धिस्त्वमनात्मज्ञप्तयास्थितः तावच्चतुर्भुजाकार-देवसंज्ञापरो भवति सति पुनर्द्वैतप्रत्ययलक्षणाबोधख्याति विगलने सामरस्ये आरूढस्य योगिनो ध्यानानुपयोगित्वं निष्कण्टकम्। एवच्च हृदि निधाय स्वयं परमेश्वरेण गणप्रमुख भृंगिरिति संहितायां निरूपितम्। सदेवाग्रे इदमासीदिति वेदेषु निश्चयः।

**न स्पन्दो नापि वै ध्यानं न स्फुरन्नपि कापि हि** इति उपक्रम्य

**सर्वं सूते जगद्यस्माद्विज्ञाना त्रायते जगत्।**

**सवितुश्चैव या शक्तिः सावित्रीति च तां जगु**रिति वोधार्क शक्तिं सावित्रीं मध्येऽभिधाय ध्यातुः या साधकैः सा हि गायत्रीस्तत् स्वरूपिणी सामरस्ये महादेविध्यानसंज्ञेविलीयते स्त्रीत्वशंका न कार्याचेत्यादिनोपसहृतम् गायत्री प्रणवैक्यं गायत्रीनिर्णये तत एवान्वेष्यम् ननु वोधादित्यस्य संबन्धि प्रकाशं धीमहीति न मनसि रोहति न हि बोधप्रकाशयोः कश्चिद्भेदः आदित्यप्रभयोरिवेति चेत् सत्यम्। उपचारेण निर्देशोयम् ओउम् नमः। परमाकाशशायिने परमात्मने राहोः शिर इत्यादिवत्। नन्वस्तु पारमेश्वर ईदृशः स्वभावः किमस्माकं तद्विमर्शेन न हि देवदत्तस्य सत्तया परोपकृतिरहितया यज्ञदत्तस्योपयोग इत्याशंक्याह वरेण्यमिति। वरेण्यं वरणीयं कांक्षणीयं निष्कारणमेव स्वरूपनिर्मलीभावापादनेन स्पृहणीयमिति यावत् इति पुष्कल एवैतद्विमर्शः। न हि स्वात्मम्भूत प्रकाशपरामर्श[१७] विस्मृतिर्युक्तोन्मत्तमृते श्रुतयो[१८] हि परामर्शमेवोपदिशन्ति तमेवैकं जानथ आत्मनमन्या वाचो विमुञ्चथ अमृतत्वस्यैष सेतुः आनन्दमयः परमात्मा स्वभावात्मा ज्ञातव्यः। तमेव विदित्वाऽमृतत्वमेतीत्यादयः। स्पृहणीयत्वमेव मनसि निधायाह भट्टनारायणः भगवन्भवभावत्कं भावं भावयितुं रुचिः पुनर्भवभयोच्छेददताकस्मैन[१९] रोचते इति। महेश्वरस्य षष्ठीविशेषणेन ध्येयत्वं दृढयति देवस्येतिदिवुक्रीड़ादौ तेन सर्वोत्तीर्णत्वं सर्वकर्तृत्वं सर्वप्रकाशकत्वं सर्वस्तुत्वं सर्वगतत्व

सूचितं सृट्याः पाण्डवोक्तायाः क्रीडायाः प्रथमं निर्देशान्मुख्यतया सच्छास्त्र प्रसिद्धारोहावरोहदोलाकेलिना विश्ववैचित्र्य क्रीडाशीलस्येत्यर्थ एकाकी नः रमाम्यहमितिन्यायात्। यथा चेयं दोलाकेलिस्तथास्तव चिन्तामणि विवृतौ क्षेमराजपादैर्दर्शितस्तृतीयश्लोके। अथ मन्त्रार्थः–

**यतो वा इमानि भूतानि जायंते येन जातानि**
**जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्म।**
**सृष्टिसंहारकर्त्तारं विलयस्थितिकारकम्**
**अनुग्रहकरं देवं प्रणतार्तिविनाशनमिति।।**

वेदतन्त्रोक्तरीत्या सदा पञ्चविधकृत्यकारित्वं चिदात्मनो भगवतः प्रसिद्धमेव। यथा भगवान्–

शुद्धाशुद्धाध्वस्फारणक्रमेण स्वरूपविकासरूपाणि सृष्ट्यादीनि करोति। तथा संकुचितचित्छक्तितया संस्कारिभूमिकायामपि[६०] पंचकृत्यानि विधत्ते एतच्च यथा तथेश्वरप्रत्यभिज्ञादौ वितन्य[६१] निर्णीतं तत एवावगन्तव्यमिति[६२] नेहायस्यते[६३] व्याख्यामात्र प्रवृत्तैरस्माभिः। जीवदशायामपि पंचविधकृत्यकारित्वमात्मीयमनवरतमेतन्मन्त्रार्थचिन्तनेन परिशील्यमानं सन् माहेश्वर्यमेवोन्मीलयेद्भक्तिभाजाम्। तरति शोकमात्मवित्, ब्रह्मविद्ब्रह्मैव भवति।[६४] तस्माच्छोभनयुक्तं वरेण्यं भर्गो देवस्य धीमहीति। ननु य आत्मनि तिष्ठन्नात्मान मन्तरोऽयम यति यमात्मानं वेदयस्यात्माशरीरं एष ते आत्मान्तर्याम्यमृत इति वाजसनेय ब्राह्मणोपनिषदन्तर्गतेऽन्तर्यामि–ब्रह्मणे अन्तर्यामी उपास्यो दृश्यते। ईश्वरो वा आत्मा वा, सर्वत्र **ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनऽतिष्ठति, तमेव शरणं गच्छेत्**यादि श्रुतिस्मृति प्रसिद्धो ध्येयो दृश्यते नतु भर्गः पठित इति कोऽयमपूर्वः प्रकाशो नामेत्याशङ्क्य एकस्या एव संविदोऽन्तर्यामीश्वरो नारायणः प्रकाशो बोधः स्वभाव इत्यादि तत्तन्नामान्तरमेवेति प्रचोदकत्वमप्यस्यैवेत्यभिसन्ध्याह धियो योनः प्रचोदयादिति। यद्वा यदि प्रकाशरूप एव गायत्र्याख्यः परमेश्वरः स्वभावस्तर्हि जाड्यमस्यायावाह्य जडप्रकाशवदित्याशंकां शिथिलयंश्चेतनत्वमुपदिशति[६५] धियो योन इति।[६६] अनेन तृतीयपादेन विमर्शात्मक एव प्रकाशतयोपोद्बलितः अन्यथा निर्विमर्शस्य जडतारूषितस्थायीप्रचोदकत्वानुपपत्तिः[६७] चेतनस्य विप्रष्टुः[६८] सर्वान्तःकरण–नियामकत्वसंभवात्[६९] यत् प्रत्यभिज्ञाग्रन्थो जरीजृंभते स्वभावमवभासस्य[७०] विमर्शं विदुरप्रकाशोऽर्थोपरार्थोविस्फटिकादिजडोपम इति।[७१] अथवा यदि भर्ग एव ध्येयः सवितृसंबन्धी तर्हि बहिस्थः सूर्यमण्डलमुपास्यमिति कस्यचिदाशंका स्यात्तन्नि–वारणायादित्यस्वरूपं निरूपयति धियो यो न इति। यः संवित्स्वरूपः श्रुतिस्मृति–विषयेऽन्तर्यामि शब्दवाच्यः चिन्ताद्वयान्ते व्यापकतयाऽनुभूयमानोऽनुसंधाता विशुद्ध

चिन्मात्रस्वरूपो जडानां प्रकाशानामपि प्रकाशकः सर्वकारणमात्मा अयमेवोन्मेष इत्युच्यते।

रहस्यशास्त्रेषु यद्धारणाभ्यासवशाद्विन्दुनादाद्यावस्था– योगिनां प्रादुर्भवन्ति नः अस्माकं रुद्रक्षेत्रज्ञप्रमातृणां धियोऽन्तःकरणानि प्रचोदयात्प्रचोदको भवति। तत्तकर्त्तव्याध्यवसायकारयितृत्वेन सर्वेन्द्रियप्रेरको भवतीत्यर्थः। अयमभिप्रायः सर्वेन्द्रियप्रवर्तको विमर्शप्राणईश्वरः[७२] सर्वज्ञः उपास्यो ब्राह्मणैर्नतु निर्विमर्शं शान्तमचेतनं ब्रह्म ध्येयमिति निष्क्रियब्रह्मवादिमतनिरास इति। अयमेवोपदिष्टः **स्पन्दे एकचिन्ता प्रसक्तस्य यतः स्यादपरोददः। उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेदिति** स्मृत्यन्नविदेपि

**जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।**
**केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमिति।।**[७३]

वसिष्ठमहर्षिणापि पदे पदे निर्णीतः।

**देशाद् देशान्तरं दूरं प्राप्तायास्संविदः क्षणात्।**
**यद्रूपममलं मध्ये तद्रूपं परमात्मनः।**

देशादेकविषयाद्देशान्तरं मध्येचिन्ताद्वयमध्ये अमलमनुसन्धेयचिन्ताद्वय–व्यापकमनुसंधातृरूपं विशुद्धचिन्मात्रमित्यर्थः। भागवतपुराणेप्येतन्मन्त्रार्थो दर्शितः। य इह वा स्थिरचरनिकराणां निजनिकेतनानां मनइन्द्रियासुगणानतात्मनः स्वयमात्मान्तर्यामी प्रचोदयतीति मयापि स्तुतिद्वारा ध्यायेम स्पृहणीयं तत्तेजः सावित्रमैश्वर्यं[७४] सदाशिवादिकीटान्त विश्वबुद्धिप्रचोदकमिति सर्वेश्वरः प्रकाशात्मा सर्वव्यापी सर्वस्तुत्यः सर्वगतः सर्वान्तर्यामी सर्वोपास्यः परमेश्वर एवेति मन्त्रपदानां लक्ष्यार्थः। वाच्यार्थस्तु निगदव्याख्यातोपि प्रतिपद व्याख्यातः। परो राजसीति मन्त्रस्तु वृहदारण्यकोपनिषद्गायत्री–'ब्राह्मणे विवृतत्वान्न निर्णीतः। अस्मदभिमते जपादौ तस्यानावर्तनीयत्व दर्शनाच्च मन्देहान्प्रति जलाञ्जलि–प्रक्षेपसमय पवनस्य पाठो दृश्यते। यत्र कैश्चिदुक्तं जप्ये तु त्रिपदा ज्ञेयाद्यर्चने तु चतुष्पदेति स्मृत्युक्तत्वाद्गायत्र्याः पूजनविषये चतुष्पदीत्वं चतुर्थः शब्दस्तु परोरंजस्य **सावितितत्रेभ्रान्ताः** पादत्रयेणैव षड्भिर्वर्णैः पादगणना–च्चतुष्पदीत्वसिद्धेः स्कन्दपुराणादिषु तथैवोक्तत्वादित्यलम्। ये सदैवैतत्परिशीलयन्ति ते स्वरूपविकासमयं विश्वं जानाना जीवन्मुक्ता इत्याम्नाताः **येतुना तथाते शुद्धप्रायाः** कर्मस्वनधिकृताः एतादृश विश्वोत्तीर्ण विश्वमयमहेश्वर प्रत्यभिज्ञार्थमेव चतुर्वेद विषय उपदेशः तपोयज्ञदानादीनां कर्मणां तत्र तत्रास्मिन्नेवार्पणे भगवतोपदिष्टम् **यत्करोषि यदनासि मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जित** इत्यादिना आसनप्राणायामादि क्लेशकल्पनाप्येतत्प्रत्यभिज्ञानं फलैव वेदयज्ञयोगादीनामीश्वरप्रत्यभिज्ञा फलत्वं। भागवते

दर्शितम्–

**वासुदेवपरा वेदा वासुदेवपरा मखाः वासुदेवपरा योगा वासुदेवपराक्रिया** इत्यादि तस्मात्सर्वप्रमातृ- भिरेतन्मन्त्रार्थचिन्तनदार्ढो न सदैव स्वात्मविमर्शः कार्यः येन कदाचिन्मन्त्रमूर्तिः स्वतन्त्रचैतन्यमहेश्वरो भगवानुन्मेषभट्टारकः स्वभावप्राप्त्युपाये समावेशात्मनिसत्पथ एवं चोदनं करिष्यतीति प्रमाता शिव एवं भवेत् तदुक्तं विज्ञानभैरवे–

**सर्वज्ञः सर्वकर्त्रा च व्यापकः परमेश्वरः स एवाहं शैवधर्म इति दार्ढ्यां छिन्द्यश्वो भवेत्** दृश्यतासंवित्सार किंजल्क चर्वर्ण चंचरीकेण भट्टनारायणे-नापित्युत्थानदशायां[७५] समावेश प्रार्थना कृता यथा **गायत्र्या गीयते यस्य धियां तेजः प्रचोदकम् चोदयेदपि कश्चिन्नः स धियः सत्पथे प्रभुरि**ति औपनिषद-पक्षेणायप्यर्थोदर्शयिष्यते। सविता आदित्य उद्गीथः प्रणव इति यावत् अथ खलु य उद्गीथः। स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ एव आदित्य उद्गीथ एष प्रणव इत्येवं ह्योहेतिश्रुतेः। सवित्रुद्गीथभक्त्यंशः प्रणवः बह्वृचीनां शास्त्राङ्गभूतं ओंकारः स एव उद्गातृणामुद्गीथः शास्त्रस्तोत्रोपकारकतया भिन्नस्थानवर्त्तिनोरोङ्कारव्यक्त्योरभेदः। सवितुः, प्राणादित्यस्य प्रणवशरीरस्य भर्गो ज्योतिश्चक्षुषि स्थितं प्रसिद्धस्य जगदवभासकत्वेन विभाव्यमानस्यादित्यस्य ज्योतिर्वाह्ये आदित्यमण्डलात्मानिश्चितं च धीमहि ब्रह्मतेजः स्वरूपेण य आदित्ये तिष्ठन् य श्चक्षुषि तिष्ठन्नित्यादिश्रुतेः। अकारोकारोमकाराख्येषु प्रणवावयवेषु एकैकं त्रिकं त्रिकमवयवशो विभज्य ओंकाराङ्गिनः ओमिति स्त्रीपुंनपुंसक लिङ्गवतो अग्निवाय्वादित्यब्रह्मरुद्रविष्णुगार्हपत्यदक्षिणाग्नि आवहनीयऋग्यजुः साम भूर्भुवः स्वर्भूतं भव्यं भविष्य प्राणोग्नि मूर्यः अन्नमापश्चन्द्रमाबुद्धिर्मनोहङ्कारः प्राणोपानोव्यान इत्यादि प्रणवात्मकं सर्वं ध्यायामः। प्राणादित्यात्मन एव ग्रहणवैशिष्ट्य ध्येयमित्यभिप्रायः। प्रणवात्मकमपि प्राणादित्ये सर्वस्य जगत ओतप्रोततयावस्थानाद्वयमेव प्रणवात्मनो नास्मत्तोन्यत्किंचिदिति धीमहित्यस्याशयः। तथा च मैत्रोपनिषत् यद्ब्रह्मतज्योतिः यज्योतिः स आदित्यः सर्व एष ओमित्येतदात्मा भवत् स त्रेधात्मानं व्यकुरुत ओमिति तिस्रो मात्राः एताभिः सर्वमोतं प्रोतं च एषोस्मि इत्येव ध्यायत आत्मानं युंजीतेति अर्थ भर्ग य इति **योरुवाश्रमुष्मिन्नादित्ये निरितूः** तार**कोलिणिवा** एष भर्गाख्योभाभिर्गतिरस्य ही ति भर्ग इत्यादिनामनु। प्रतीकार्थोस्यामेव षष्ठे प्रपाठके वितत्य निर्धारित इति तत्रैवावधार्य इति। अन्यविवरणकारैरपि एतां च संध्यादौ जपतोऽनाद्यविद्यावासनो पप्लवोपप्लुत-देहेन्द्रियाद्युपद्रवविद्रवे सत्यखिलप्रपञ्चविहीनचैतन्यसुखभावपरंब्रह्मलयलक्षण मोक्षप्राप्तिर्भवति। कामिनां च स्वर्गादिप्राप्तिरित्युक्तमिति शिवम्। परतत्वात्परैरविना

गायत्रीमन्त्र उत्तमेव्याख्या विदुषाशिवेनरम्याशंकर चोदनवशीकृते नेयम्। समाप्तेयं गायत्रीमन्त्रविवृतिः स्मृतिः।

श्रीशिवस्वामिनः—

**उपाध्यायकुलोत्पन्नशिवरामप्रकाशिता।**
**श्रीविद्यातुष्टये भूयाद्गायत्रीविवृतिः परा।**
**यद्यपीयं मया दृष्टास्वात्मानन्दविवृद्धये।**
**अन्योपि कश्चित्तदपि कृतकृत्योऽनया भवेत्।।**
**शास्त्रान्तरैकरसिकैः क्षन्तव्यं विबुधैः परैः।**
**स्वविनोदं विरचयन्ननिन्द्यो यज्जनो भुवि।।**